साधनचतुष्टयसम्पन्नानां मुमुक्षूणामुपयोगी—

योगवासिष्ठसारः

अयम्—

श्रीमद्भिः "वातुल" इत्युपाहितैः
पण्डित-श्रीधरजीवैः

सहायितेन

पण्डित-केशवभट्टज्योतिर्विदा

संस्कृतः शोधितश्च।

मूल्यम् ३) आणकत्रयम्।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

साधनचतुष्टयसम्पन्नानां मुमुक्षूणामुपयोगी

श्रीमद्भिः "मातुलू" इत्युपहितैः पण्डित-श्रीधरजीवैः

सहायितेन

पण्डित-केशवभट्टज्योतिर्विदा

संस्कृतः शोधितश्चायं

योगवासिष्ठसारः ।

मुम्बय्यां

"श्रीवेङ्कटेश्वर" स्टीम्-प्रेसाख्य-

मुद्रणयन्त्रालयेऽङ्कयित्वा प्राकाश्यं नीतः ।

सप्तर्षिवत्सरे ५००४ विक्रमसंवत्सरे १९८५

ईस्वीवत्सरे १९२८ परोपकाराय

प्राकाश्यं नीतः

मूल्यम् ।) आणकचतुष्कम् ॥

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

मुद्रक—
खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस,
बम्बई.

प्रकाशक—
पं० केशवभट्ट ज्योतिषी,
पाठशाला टीचर "जिला" रैणावारी,
"महल्ला" भाग ज्योगीलङ्कर
कश्मीर श्रीनगर.

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

ॐ नमः प्रतीचे ब्रह्मणे ।

अथ योगवासिष्ठसारः ।

दिक्कालाद्यऽनवच्छिन्नाऽनन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ १ ॥
अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः ।
नात्यन्तमज्ञो नो तज्ज्ञः सोऽस्मिञ्छास्त्रेऽधिकारवान् ॥ २ ॥
यावन्नाऽनुग्रहः साक्षाज्जायते परमेश्वरात् ।
तावन्न सद्गुरुं कश्चित्सच्छास्त्रं वाऽपि नो लभेत् ॥ ३ ॥
महानुभावसम्पर्कात्संसारार्णवलङ्घने ।
युक्तिः संप्राप्यते राम दृढा नौरिव नाविकात् ॥ ४ ॥
संसारदीर्घरोगस्य सुविचारो महौषधम् ।
कोऽहं कस्य च संसारो विवेकेन विलीयते ॥ ५ ॥
यस्मिन्देशे मरौ तज्ज्ञो नास्ति सज्जनपादपः ।
सफलः शीतलच्छायो न तत्र दिवसं वसेत् ॥ ६ ॥
सदा सन्तोऽभिगन्तव्या यद्यप्युपदिशन्ति न ।
या हि स्वैरकथास्तेषामुपदेशा भवन्ति ताः ॥ ७ ॥
शून्यमापूर्णतामेति मृत्युरप्यऽमृतायते ।
आपत्सम्पदिवाभाति विद्वज्जनसमागमात् ॥ ८ ॥

CC-0: Tej K Zadoo Collection. Digitized by eGangotri

ज्ञानिनामपि चित्तं चेत्केवलात्मसुखोदितम् ।
सत्त्वाः संसारदुःखार्ताः कं यान्ति शरणं तदा ॥ ९ ॥
तज्ज्ञानं स च शास्त्रार्थस्तद्विज्ञानमखण्डितम् ।
सच्छिष्याय विरक्ताय साधुर्[1]यदुपदिश्यते ॥ १० ॥
उपदेशक्रमो राम व्यवस्थामात्रपालनम् ।
ज्ञप्तेस्तु कारणं शुद्धा शिष्यप्रज्ञैव केवला ॥ ११ ॥
न शास्त्रैर्नापि गुरुणा दृश्यते परमेश्वरः ।
दृश्यते स्वात्मनैवात्मा स्वया सत्त्वस्थया धिया ॥ १२ ॥
सर्वैव हि कला जन्तोरनभ्यासेन नश्यति ।
इयं ज्ञानकला राम सकृज्जाताऽभिवर्धते ॥ १३ ॥
स्वकण्ठेऽपि स्थितं वस्तु यथा न प्राप्यते भ्रमात् ।
भ्रमान्ते प्राप्यते तद्वदात्माऽपि गुरुवाक्यतः ॥ १४ ॥
स्वस्वरूपमऽजानन्वै जनोऽयं दैववञ्चितः ।
विषयेषु सुखं वेत्ति पश्चात्पाके[2] विषान्नवत् ॥ १५ ॥
बुद्धाऽप्यऽत्यन्तवैरस्यं यः पदार्थेषु दुर्मतिः ।
बध्नाति भावनां भूयो नरो नासौ स गर्दभः ॥ १६ ॥
यत्किञ्चिदपि संकल्पान्नरो दुःखे निमज्जति ।
न किञ्चिदपि संकल्पात्सुखमक्षयमश्नुते ॥ १७ ॥
यथा स्वप्नमुहूर्ते स्यात्संवत्सरशतभ्रमः ।
तथा मायाविलासोऽयं जायते जाग्रति भ्रमः ॥ १८ ॥

---

१ श्रोत्रियब्रह्मनिष्ठः । २ परिणामे दुःखप्रदम् ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

योऽन्तःशीतलया बुद्ध्या रागद्वेषविमुक्तया ।
साक्षिवत्पश्यतीदं हि जीवितं तस्य शोभते ॥ १९ ॥
येन सम्यक् परिज्ञातं हेयोपादेयमुज्झता ।
चित्तस्यान्तः स्थितं चित्तं जीवितं तस्य शोभते ॥२०॥
हृदयाकाशमात्रस्य विनाशो देहनाशतः ।
व्यर्थं भूतानि शोचन्ति नष्ट आत्मेति शङ्कया ॥ २१ ॥
घटादिषु प्रनष्टेषु यथाऽऽकाशमखण्डितम् ।
तथा देहेषु नष्टेषु देही नित्यमऽलोपकः[1] ॥ २२ ॥
न जायते न म्रियते क्वचित्किञ्चित्कदाचन ।
जगद्विवर्तरूपेण केवलं ब्रह्म जृम्भते ॥ २३ ॥
आकाशादपि विस्तीर्णः शुद्धः सूक्ष्मोऽव्ययः शिवः ।
य आत्मा स कथं राम जायते म्रियतेऽथवा ॥ २४ ॥
सर्वमेकमिदं शान्तमादिमध्यान्तवर्जितम् ।
भावाभावविनिर्मुक्तमिति मत्वा सुखी भव ॥ २५ ॥
वरं[2] शरावहस्तस्य चण्डालागारवीथिषु ।
भिक्षार्थमटनं राम न मौर्ख्यहतजीवितम् ॥ २६ ॥
न व्याधिर्न विषं नापत्तथाऽन्यद्वाऽपि भूतले ।
दुःखाय स्वशरीरोत्थं[3] मौर्ख्यमेतद्यथा नृणाम् ॥ २७ ॥

इति श्रीयोगवासिष्ठसारे वैराग्यप्रकरणं प्रथमम् ।

---

१ नाशरहितः । २ मनाक्प्रियम् । ३ देहाभिमानोत्थम् ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

श्रीवसिष्ठः ।

संयमान्मनसः शान्तिमेति संसारविभ्रमः ।
मन्दरेऽस्पन्दतां याते यथा क्षीरमहार्णवः ॥ १ ॥
चित्तोन्मेषनिमेषाभ्यां संसारस्योदयक्षयौ ।
वासनाप्राणसंरोधादनुन्मेषं मनः कुरु ॥ २ ॥
अयं हि स्वविकल्पोत्थः स्वविकल्पपरिक्षयात् ।
क्षीयते दग्धसंसारो निःसार इति निश्चयः ॥ ३ ॥
परिज्ञानेन सर्पत्वं चित्रसर्पस्य नश्यति ।
यथा तथैव संसारः स्थित एवोपशाम्यति ॥ ४ ॥
पुंसो निजमनोमोहकल्पितोऽनल्पदुःखदः ।
संसारचिरवेतालो विचारेण विलीयते ॥ ५ ॥
ईदृशी राम मायेयं या स्वनाशेन हर्षदा ।
न लक्ष्यते स्वभावोऽस्याः प्रेक्षमाणैव नश्यति ॥ ६ ॥
अहो नु चित्रा मायेयं तात विश्वविमोहिनी ।
सर्वाङ्गप्रोतमऽप्येनं ययाऽऽत्मानं न पश्यति ॥ ७ ॥
यदिदं दृश्यते किञ्चित्तन्नास्ति किमपि ध्रुवम् ।
यथा गन्धर्वनगरं यथा वारि मरुस्थले ॥ ८ ॥
यत्तु नो दृश्यते किञ्चिदऽन्तिस्थमपि किञ्चन ।
अविनाशं यदस्तीह तत्सदात्मेति कथ्यते ॥ ९ ॥

---

१ नतु नष्टः । दर्पणे वदनमिव ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

स्वज्ञानदर्पणे स्फारे समस्ता वस्तुजातयः ।
इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः ॥ १० ॥
सर्गश्चित्स्पन्दमात्रात्मा सम्यग्दृष्टौ विलीयते ।
उदेत्यऽसम्यग्दृष्टौ च रज्ज्वां सर्पभ्रमो यथा ॥ ११ ॥
भोगभावनया याति बन्धो दार्ढ्यमऽवस्तुजः ।
तयोपशान्तया याति बन्धो जगति तानवम् ॥ १२ ॥
मनः सम्पद्यते तस्मान्महतः परमात्मनः ।
स्वस्थिरादस्थिराकारं तरङ्ग इव वारिधेः ॥ १३ ॥
यत्स्वयं स्वैरमेवाशु सङ्कल्पयति नित्यशः ।
तेनेयमिन्द्रजालश्रीर्जागती[1] प्रवितन्यते ॥ १४ ॥
यथा बालस्य वेतालो मृत्युपर्यन्तदुःखदः ।
असदेव सदाभासं तथा मूढमतेर्जगत् ॥ १५ ॥
अव्युत्पन्नस्य विकृते कानके कटके यथा ।
कटकज्ञप्तिरेवास्ति न मनागपि हेमधीः ॥ १६ ॥
तथाऽज्ञस्य पुरागारनगनागेन्द्रगोचरा ।
इयं दृश्यदृगेवास्ति नत्वन्या परमार्थदृक् ॥ १७ ॥
अज्ञस्य दुःखौघमयं ज्ञस्यानन्दमयं जगत् ।
अन्धं भुवनमन्धस्य प्रकाशं तु सुचक्षुषः ॥ १८ ॥
यथा विशुद्ध आकाशे सहसैवाभ्रमण्डलम् ।
भूत्वा विलीयते तद्वदात्मनीहाखिलं जगत् ॥ १९ ॥

---

१ जगत्सम्बन्धिनी ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

आदित्याव्यतिरेकेण रश्मयो येन भाविताः ।
आदित्य एव ते तस्य निर्विकल्पः स उच्यते ॥ २० ॥
तन्तुमात्रो भवत्येव पटो यद्वद्विचारितः ।
आत्मतन्मात्र एवेदं तद्वद्विश्वं विचारितम् ॥ २१ ॥
विश्ववीचिविलासोऽयं चित्सुधाब्धेरुदेति च ।
विलीयते च तत्रैव मध्ये कथमतन्मयः ॥ २२ ॥
यथा न तोयतो भिन्नाः फेनोर्मिहिमबुद्बुदाः ।
आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतम् ॥ २३ ॥
मृदि कुम्भो जले वीचिः कनके कटकं यथा ।
आत्मनोऽपि तथा विश्वमात्मन्येव विलीयते ॥ २४ ॥
आत्माज्ञानाज्जगद्भाति ह्यात्मज्ञानाद्विलीयते ।
रज्ज्वऽज्ञानादऽहिर्भाति तज्ज्ञानाच्च निवर्तते ॥ २५ ॥
तस्यादृश्यात्मतत्त्वस्य विस्मृत्यैव स्थितिं गतिम् ।
जगत्स्यादीश्वराद्राम! जगद्रज्जुभुजङ्गवत् ॥ २६ ॥
स्वप्नो जाग्रत्यऽसद्रूपः सुप्तौ जाग्रदऽसद्वपुः ।
मृतिर्जन्मन्यऽसद्रूपा मृतौ जन्माप्यऽसन्मयम् ॥ २७ ॥
एवं न सन्नासदिति भ्रान्तिमात्रं विजृम्भते ।
अनुभूयत एवाशु किञ्चित्सर्वानुभूतिषु ॥ २८ ॥
प्रथमे प्रकरणे ॥ २७ ॥ सर्वे श्लोकाः । ५५ ।

इति श्रीयोगवासिष्ठसारे जगन्मिथ्यात्ववर्णनं नाम द्वितीयं प्रकरणम् ॥ २ ॥

---

१ 'ईश्वरं ज्ञात्वा' । २ नश्वरम् । ३ प्रतिभासात्मत्वं विचारेणासत्त्वं, भ्रान्तावेवोपपन्नम् ॥

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

श्रीवसिष्ठः ।

ॐ तत्त्वावबोध एवैकः सर्वाशातृणपावकः ।
प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः॥ १ ॥
चिदाकारमिदं सर्वं जगदित्येव भावयन् ।
यस्तिष्ठत्युपशान्तात्मा स ब्रह्मकवचः सुखी ॥ २ ॥
सर्वातीतपदालम्भी पूर्णेन्दुशिशिराशयः ।
यस्तिष्ठति सदा योगी स एव परमेश्वरः ॥ ३ ॥
ब्रह्मोपनिषदां तत्त्वं भावयन्योऽन्तरात्मना ।
नोद्वेगी न च तुष्टात्मा संसारे नावमज्जति ॥ ४ ॥
यथा पर्वतमादीप्तं नाश्रयन्ति मृगा द्विजाः ।
तद्वद्ब्रह्मविदं दोषा नाश्रयन्ति कदाचन ॥ ५ ॥
असन्त इव सन्तोऽपि कोपयन्ति परं नरम् ।
निजं कर्म गुणोदारपरिपाकं परीक्षितुम् ॥ ६ ॥
ज्ञात्वाऽप्यसर्पं सर्पोऽयं यथा कम्पं न मुञ्चति ।
विध्वस्ताखिलमोहोऽपि मोहकार्यं तथाऽत्मवित्॥७ ॥
स्फटिकः प्रतिबिम्बेन यथा नायाति रञ्जनम् ।
तज्ज्ञः कर्मफलेनान्तस्तथा नायाति रञ्जनम् ॥ ८ ॥

---

१ दुर्वचसां सहनाऽसहनरूपम् । २ त्रिभिर्गुणैरुदारो यः परिपाकः फलम् यस्य तत् । निर्द्वन्द्वत्वमित्यर्थः । ३ किञ्चित्कालम् । ४ यावत्प्रारब्धभोगकालम् ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

अन्तर्मुखतया तिष्ठन्बहिर्वृत्तिपरोऽपि सन् ।
परिश्रान्ततया नित्यं निद्रालुरिव लक्ष्यते ॥ ९ ॥
अद्वैते स्थैर्यमायाते चित्ते च प्रशमं गते ।
योगिनः कर्म कुर्वन्ति पश्यन्तः स्वप्नवज्जगत् ॥१० ॥
अद्यैव मरणं वाऽस्तु कल्पान्तनिचयेन वा ।
तज्ज्ञः कलङ्कं नाप्नोति हेम पङ्कगतं यथा ॥ ११ ॥
तनुं त्यजतु वा काश्यां श्वपचस्य गृहेऽथवा ।
ज्ञानसम्प्राप्तिसमये मुक्तोऽसौ विगताशयः ॥ १२ ॥
गोष्पदं पृथिवी मेरुः स्थाणुराशाः समुद्रिकाः ।
तृणं त्रिभुवनं राम नैराश्यालंकृताकृतेः ॥ १३ ॥
अन्तःशून्यो बहिःशून्यः शून्यकुम्भ इवाम्बरे ।
अन्तःपूर्णो बहिःपूर्णः पूर्णकुम्भ इवार्णवे ॥ १४ ॥
ईप्सितानीप्सिते न स्तो यस्यान्तर्वस्तुदृष्टिषु ।
सुप्तवद्यश्च चरति स मुक्त इति कथ्यत ॥ १५ ॥
निर्ग्रन्थिः शान्तसन्देहो जीवन्मुक्तः स्वभावतः ।
अनिर्वाणोऽपि निर्वाणश्चित्रदीप इव स्थितः ॥ १६ ॥
अहङ्कारमयीं त्यक्त्वा वासनां लीलयैव यः ।
तिष्ठति ध्येयसन्त्यागी जीवन्मुक्तः स उच्यते ॥ १७ ॥

---

१ परिगत इतिकर्तव्यताश्रमो यस्य तथा कृतकृत्यत्वात्। २ यथाप्राप्तम्।
३ जलस्थाने ।४ रागद्वेषौ। ५निरहंकारः।६ प्रशममुपगतः। ७मन्त्रितसर्पवत्।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

दूरे मुञ्चति बन्धुमन्धुमिव यः सङ्गाद्भुजङ्गादिव ।
त्रासं यो विदधाति वेत्ति सदृशं रोगं च भोगं च यः ॥
स्त्रैणे यस्तृणवद्घृणां प्रकुरुते मित्रेष्वमित्रेष्वपि ।
स्वान्तं यस्य समं स मङ्गलमिहामुत्रापि मर्त्योऽश्नुते १८
हृदयात्संपरित्यज्य सर्वं दृश्यं प्रशान्तधीः ।
व्योमसौम्यतरोऽव्यग्रः स मुक्तः परमेश्वरः ॥ १९ ॥
समाधिमथ कर्माणि मा करोतु करोतु वा ।
हृदयेनास्तसर्वाशो मुक्त एवोत्तमाशयः ॥ २० ॥
अनात्मन्यान्मधीर्बन्धस्तन्नाशो मोक्ष उच्यते ।
बन्धमोक्षौ न विद्येते नित्यमुक्तस्य चात्मनः ॥ २१ ॥
दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् ।
सम्पन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ॥ २२ ॥
न मोक्षो नभसः पृष्ठे न पाताले न भूतले ।
सर्वाशासंक्षये चेतःक्षयो मोक्ष इहोच्यते ॥ २३ ॥
अनन्ते चिद्घनानन्दे निर्विकल्पैकरूपिणि ।
स्थिते द्वितीयस्याभावात्को बद्धः कश्च मुच्यते ॥ २४ ॥
तस्मादुल्लासमात्रं तु मनसो बन्धतां[1] गतः ।
मनःप्रशमने राम मोक्ष एवावशिष्यते ॥ २५ ॥
प्रथमयोः प्रकरणयोः ॥ ५५ ॥ सर्वे ८० ।

इति श्रीयोगवासिष्ठसारे जीवन्मुक्तप्रकरणं नाम तृतीयम् ॥ ३ ॥

---

१ बन्धमोक्षयोरन्योन्यापेक्षया भासमानत्वादात्यन्तिकोऽभाव इत्यर्थः।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

श्रीवसिष्ठः ।

एषा स्वभावाभिमतं स्वतः संकल्प धावति ।
चेतना[1] स्वयमम्लाना[2] सैवेहा[3] मन आत्मनः ॥ १ ॥
एतस्मात्सर्वगाद्वात्सर्वशक्तेर्महात्मनः ।
विभागकल्पना शक्तिर्लहरीवोत्थिताऽम्भसः ॥ २ ॥
अन्तःसंकल्पसिद्धेयं संकल्पेनैव शाम्यति ।
येनैव जायते तेन वह्निज्वालेव वायुना ॥ ३ ॥
मनोऽमुनैवाभ्युदितं मनागेवानवेक्षणात् ।
स्वस्वप्ने मरणाकारं प्रेक्ष्यमाणं न विद्यते ॥ ४ ॥
असम्यग्दर्शनं यत्स्यादऽनात्मन्यात्मभावनम् ।
यदवस्तुनि वस्तुत्वं तन्मनो विद्धि राघव ॥ ५ ॥
अयं सोऽहमिदं तन्म[4] एतावन्मात्रकं मनः ।
तदभावनमात्रेण विचारेण विलीयते ॥ ६ ॥
उपादेयानुपतनं हेयैकान्तविवर्जनम् ।
यदेतन्मनसो रूपं तद्बन्धं विद्धि नेतरत् ॥ ७ ॥
मनो हि जगतां कर्तृ मनो हि पुरुषः स्मृतः ।
मनःकृतं कृतं लोके न शरीरकृतं कृतम् ॥ ८ ॥
चित्तं कारणमर्थानां तस्मिन्सति जगत्त्रयम् ।
तस्मिन्क्षीणे जगत्क्षीणं तच्चिकित्स्यं प्रयत्नतः ॥ ९ ॥

---

१ ज्ञानशक्तिः । २ अविकृतिस्वभावः । ३ चेष्टा । ४ भेददृष्टिः ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

राम वासनया बद्धं मुक्तं निर्वासनं मनः ।
तस्मान्निर्वासनीभावमावहाशु विवेकतः ॥ १० ॥
यथाऽभ्रलेखा शशिनं सुधालेपं मषी यथा ।
दूषयत्येवमेवान्तर्नरमाशापिशाचिका ॥ ११ ॥
अन्तर्मुखतया सर्वं चिद्रह्मौ त्रिजगत्तृणम् ।
जुह्वतोऽन्तर्निवर्तन्ते राम चित्तादिविभ्रमाः ॥ १२ ॥
तात चिन्मात्ररूपोऽसि न ते भिन्नमिदं जगत् ।
अतस्तव कथं कुत्र हेयोपादेयकल्पना ॥ १३ ॥
यदा न भाव्यते किञ्चिद्धेयोपादेयरूपि यत् ।
स्थीयते सकलं त्यक्त्वा तदा चित्तं न जायते ॥ १४ ॥
घोरं[1] जाग्रन्मयं चित्तं मूढं[2] स्वप्नेऽप्यवस्थितम् ।
शान्तं[3] सुषुप्तभावस्थं त्रिभिर्हीनं[4] मृतं[5] भवेत् ॥ १५ ॥
विलाप्य पङ्कं कतकं रजोऽप्सु विलयं नयेत् ।
यथाऽऽत्मनि तथा विद्धि विलाप्य विलयं मनः ॥ १६ ॥
चित्तं जानीहि संसारं बन्धश्चित्तमुदाहृतम् ।
पादपः पवनेनेव देहश्चित्तेन चाल्यते ॥ १७ ॥
हस्तं हस्तेन संपीड्य दन्तैर्दन्तांश्च पीडयन् ।
अङ्गान्यङ्गैः समाक्रम्य जयेदादौ स्वकं मनः ॥ १८ ॥

---

१ सत्यत्वबुद्ध्या क्षोभमयम् । २ परोक्षज्ञानेऽदृढे सति असता भासनात् । ३ अपरोक्षे दृढे सति विकल्पहीनम् । ४ पदार्थाभावनी षष्ठीत्यात्मिकायां ज्ञानभूमिकायां दृश्याभासात् पदैः । ५ निस्त्रैगुण्यम् ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

चित्तमेकं न शक्नोति जेतुं स्वातन्त्र्यवर्ति यत् ।
ध्यानवार्त्तां वदन्मूढः स किं लोके न लज्जते ॥ १९ ॥
एक एव मनोदेवो जितः सर्वार्थसिद्धिदः ।
अन्यत्र विफलः क्लेशः सर्वेषां तज्जयं विना ॥ २० ॥
अनुद्वेगः श्रियो मूलमनुद्वेगात्प्रवर्तते ।
जन्तोर्मनोजयादन्यस्त्रैलोक्यविजयस्तृणम् ॥ २१ ॥
सत्सङ्गो वासनात्यागोऽध्यात्मविद्याविचारणम् ।
प्राणस्पन्दनिरोधश्चेत्युपाया मनसो जये ॥ २२ ॥
पूर्णे मनसि सम्पूर्णं जगत्सर्वं सुधाद्रवैः ।
उपानद्गूढपादस्य ननु चर्मावृतैव भूः ॥ २३ ॥
नाहं ब्रह्मेति सङ्कल्पात्सुदृढं बद्ध्यते मनः ।
सर्वं ब्रह्मेति संकल्पात्सुदृढं मुच्यते मनः ॥ २४ ॥
चित्ते त्यक्ते लयं याति द्वैतमैक्यं च सर्वशः ।
शिष्यते च परं ब्रह्म शान्तं नित्यमनामयम् ॥ २५ ॥
चिन्मात्रत्वं प्रयातस्य तीर्णवृत्योः संचेतसः ।
यो भवेत्परमानन्दः केनासावुपमीयते ॥ २६ ॥

प्रकरणत्रयाणां ८० । सर्वे श्लोकाः १०६ ॥

इति श्रीयोगवासिष्ठसारे तत्त्वनिरूपणं नाम चतुर्थं प्रकरणम् ॥ ४ ॥

---

१ अनिर्विण्ण मुमुक्षुः । २ विवेकिनः ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

श्रीवसिष्ठः ।

राम स्वात्मविचारोऽयं कोऽहं स्यामितिरूपकः ।
चित्तदुर्द्रुमवृक्षस्य दहने दहनः स्मृतः ॥ १ ॥
विचारदर्पणे लग्नां धियं धैर्यधुरं गताम् ।
आधयो न विलुम्पन्ति वाताश्चित्रलतामिव ॥ २ ॥
विचारोऽध्यात्मविद्यानां ज्ञानं तत्त्वविदो विदुः ।
ज्ञेयं तस्यान्तरेवास्ति माधुर्यं पयसो यथा ॥ ३ ॥
विचारेण परिज्ञातस्वभावस्योदितात्मनः ।
अनुकम्प्या[1] भवन्तीह ब्रह्मविष्णुशिवादयः ॥ ४ ॥
किमिदं विश्वमखिलं किं स्यामहमिति स्वयम् ।
विचारनिरतस्यैतदसदेव जगद्भवेत् ॥ ५ ॥
यस्य मौर्ख्यं क्षयं यातं सर्वं ब्रह्मेति भावनात् ।
नोदेति वासना तस्य प्राज्ञस्याम्बुमतिर्मरौ ॥ ६ ॥
वासनासंपरित्यागाच्चित्तं गच्छत्यचित्तताम् ।
प्राणस्पन्दनिरोधाच्च यथेच्छसि तथा कुरु ॥ ७ ॥
साधुसंगमसच्छास्त्रपरो भवसि राम चेत् ।
तद्दिनैरेव नो मासैः प्राप्नोषीमां परां धियम् ॥ ८ ॥
सत्सङ्गव्यवहारित्वाद्भवभावनवर्जनात् ।
शरीरनाशदर्शित्वाद्वासना न प्रवर्तते ॥ ९ ॥

---

१ मायासमुद्रे तृणवदुह्यमानत्वात्तेष्वपि सति सङ्गे कातर्यं भासते, किमुतान्येष्विति भावः ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

दृढभावानुसन्धानाद्विमूढा अपि राघव ।
विषं नयन्त्यमृततामृतं विषतामपि ॥ १० ॥
सत्यभावेन दृष्टोऽयं देहो देहो भवत्ययम् ।
दृष्टस्त्वऽसत्यभावेन व्योमतां याति देहकः ॥ ११ ॥
सुखतल्पगतो येन स्वप्नदेहेन दिक्तटान् ।
परिभ्रमसि हे राम स देहस्ते क्व साम्प्रतम् ॥ १२ ॥
देहोऽहमिति धीस्त्याज्या सर्वनाशेऽप्युपस्थिते ।
स्प्रष्टव्या सा न भव्येन सश्वमांसीव पुक्कसी ॥ १३ ॥
ब्रह्मैकं भावयन्साधो चर तिष्ठ गतव्यथः ।
ततस्तेऽसावहंकारः स्वयमेवोपशाम्यति ॥ १४ ॥
सर्वत्रैक्यावबोधेन स्वस्थोऽन्तःशीतलाशयः ।
निरहंकृतिराकाशविशदस्तेन संस्थितः ॥ १५ ॥
अन्तःशीतलतायां तु लब्धायां शीतलं जगत् ।
अन्तस्तापेन तप्तानां दावदाहमयं जगत् ॥ १६ ॥
चतुःप्रकरणानाम् १०६ । सर्वे १२२ ॥

इति श्रीयोगवासिष्ठसारे वासनापरामर्शो नाम पञ्चमं प्रकरणम् ॥ ५ ॥

---

१ बन्धनत्वमापद्यते ॥

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

श्रीवसिष्ठः ।

शुद्धो निरञ्जनोऽनन्तो बोधोऽहं प्रकृतेः परः ।
चेष्टमानमिमं देहं पश्याम्यन्यशरीरवत् ॥ १ ॥
एते हि चिद्विलासान्ता[1] मनोबुद्धीन्द्रियादयः ।
असन्तः सन्त एवाहो अवधानं[2] विना स्थिताः ॥ २ ॥
आपद्यचलचित्तोऽस्मि जगन्मित्रं च सम्पदि ।
भावाभावविहीनोऽस्मि तेन जीवाम्यनामयम् ॥ ३ ॥
निरीहोऽस्मि निराशोऽस्मि खवत्स्वस्थोऽस्मि निःस्पृहः ।
शान्तोऽस्म्यहमरूपोऽस्मि चिरायुरचलस्थितिः ॥ ४ ॥
चिदेव पञ्च भूतानि चिदेव भुवनत्रयम् ।
विज्ञातमधुना सम्यगहमेव चिदेव हि ॥ ५ ॥
सर्वातीतः सर्वगश्च खमिवायमहं स्थितः ।
यत्तदस्ति तदेवास्मि वक्तुं शक्नोमि नेतरत् ॥ ६ ॥
मय्यनन्तचिदम्भोधावाश्चर्यं जीववीचयः ।
समुल्लसन्ति खेलन्ति प्रविशन्ति स्वभावतः ॥ ७ ॥
मय्यनन्तचिदम्भोधौ विश्ववीच्यादिकल्पना ।
उदेतु वाऽस्तमायातु न मे वृद्धिर्न च क्षितिः ॥ ८ ॥
मदज्ञानोदितं विश्वं मय्येव लयमागतम् ।

---

१ चिज्ज्ञानोदय एवं नाशो येषां, सूर्योदय इव तमसाम् । २ मनोविक्षप एवैषां जीवनम् ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

अपरोक्षचिदानन्दसाम्राज्यमधुनाऽस्म्यहम् ॥ ९ ॥
सर्वभूतान्तरस्थाय नित्यमुक्तचिदात्मने ।
प्रत्यक्चैतन्यरूपाय मह्यमेव नमो नमः ॥ १० ॥
पञ्चप्रकरणानाम् ॥ १२२ ॥ सर्वे श्लोकाः ॥ १३२ ॥

इति श्रीयोगवासिष्ठसारे आत्ममननं नाम षष्ठं प्रकरणम् ॥ ६ ॥

श्रीवसिष्ठः ।

बहिः कृत्रिमसंरम्भो हृदि संरम्भवर्जितः ।
कर्ता बहिरकर्ताऽन्तर्लोके विहर राघव ॥ १ ॥
अन्तः सन्त्यक्तसर्वाशो वीतरागो विवासनः ।
बहिः सर्वसमाचारो लोके विहर राघव ॥ २ ॥
अन्तस्त्वेको बहिर्नैको हृदि बोधो बहिर्जडः ।
अन्तस्त्यागी बहिः संगी लोके विहर राघव ॥ ३ ॥
पूर्णां दृष्टिमवष्टभ्य ध्येयत्यागविलासिनीम् ।
जीवन्मुक्ततया स्वस्थो लोके विहर राघव ॥ ४ ॥
एको विबुद्धबोधोऽहमिति निश्चयवह्निना ।
प्रज्वाल्य द्वैतगहनमेक एव सुखी भव ॥ ५ ॥
देहोऽहमिति पाशेन दृढं बद्धोऽसि सर्वतः ।
बोधोऽहंज्ञानखड्गेन तं निकृत्य सुखीभव ॥ ६ ॥

---

१ धर्मधर्मिणोरभेदविवक्षया सम्राट्, स्वातन्त्र्यमित्यर्थः ॥

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

अनात्मनि रतिं त्यक्त्वा निर्विभागो जगत्स्थितौ ।
एकनिष्ठतयाऽन्तःस्थः सच्चिन्मात्रपरो भव ॥ ७ ॥
अजाग्रत्स्वप्ननिद्रस्य यत्ते रूपं सनातनम् ।
सचेतनं विशुद्धं च तन्मयो भव सर्वदा ॥ ८ ॥
मा भव ग्राह्यभावात्मा ग्राहकात्मा च मा भव ।
भावनामखिलां त्यक्त्वा यन्मयस्तन्मयो भव ॥ ९ ॥
संकल्पेनैव संकल्पं मनसैव मनो मुने ।
छित्त्वा स्वात्मनि तिष्ठ त्वं किमेतावति दुष्करम् ॥ १० ॥
कस्तवायं जडो मूको देहो भवति राघव ।
यदर्थं सुखदुःखाभ्यामवशः परिभूयसे ॥ ११ ॥
क्व मांसरुधिरास्थीनि क्व त्वं चैतन्यविग्रहः ।
विजानन्नपि देहेऽस्मिन्नात्मबुद्धिं जहासि किम् ॥ १२ ॥
एतावतैव देवेशः परमात्माऽवगम्यते ।
काष्ठलोष्टसमत्वेन देहो यदवगम्यते ॥ १३ ॥
अहो नु चित्रं यत्सत्यं ब्रह्म तद्विस्मृतं नृणाम् ।
यदसत्यमविद्याख्यं तत्पुरः परिवल्गते ॥ १४ ॥
अन्यच्चित्रं यत्परमं ब्रह्म तद्विस्मृतं नृणाम् ।
यन्मयमेदमविद्याख्यं तत्पुरः प्रवलायते ॥ १५ ॥
षट् प्रकरणानाम् ॥ १३२ ॥ सर्वे श्लोकाः ॥ १४७ ॥

इति श्रीयोगवासिष्ठसारे ब्रह्मनिरूपणं नाम सप्तमं प्रकरणम् ॥ ७ ॥

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

श्रीवसिष्ठः ।

यदि देहं पृथक्कृत्य चिति विश्रम्य तिष्ठसि ।
तदा तृणीकृताशेषः स्वयमेको भविष्यसि ॥ १ ॥
येनेदं वेत्सि तज्ज्ञात्वा कुरु प्रत्यङ्मुखं मनः ।
ततः प्रकाशरूपं त्वं द्रक्ष्यसि स्फुटमात्मनः ॥ २ ॥
येन शब्दं रसं रूपं गन्धं जानासि राघव ।
तमात्मानं परंब्रह्म जानीहि परमेश्वरम् ॥ ३ ॥
यत्र भावा[1] हि निस्पन्दे निर्भीयन्ते[2] च येन च ।
तमेवात्मानमात्मानं रूपं जानीहि राघव ॥ ४ ॥
यद्यज्ज्ञेयमिदं तत्त्वं नेति सन्त्यज्य युक्तिभिः ।
प्राप्यावशिष्टचिन्मात्रं सोऽस्मि सोऽस्मीति भावय ॥ ५ ॥
ब्रह्मविष्णुशिवेन्द्राद्या यद्यत्कुर्वन्ति सर्वतः ।
तदहं चिद्वपुः सर्वं करोमीत्येव भावय ॥ ६ ॥
ज्ञानं न भवतो भिन्नं ज्ञेयं ज्ञानात्पृथङ्न हि ।
अतो न त्वितरत्किञ्चित्तस्माद्भेदो न विद्यते ॥ ७ ॥
अहं सर्वमिदं विश्वं परमात्माऽहमव्ययः ।
न भूतं नास्मि नो भावि मत्तोऽन्यदिति भावय ॥ ८ ॥
एकं ब्रह्म चिदाकारं सर्वात्मकमखण्डितम् ।
निष्कम्पं भूरिवाशेषमिति भावय यत्नतः ॥ ९ ॥

---

१ द्वैतं स्फुरति । २ यत्सत्तया रज्जौ सर्पवत्प्रादुर्भवन्ति च ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

नाहं न चान्यद्वाऽस्तीति ब्रह्मैवास्ति निरन्तरम् ।
आनन्दपूर्वं[२] सर्वत्रेत्यनुद्वेगादुपास्यताम् ॥ १० ॥
ग्राह्यग्राहकसम्बन्धे सामान्ये सर्वदेहिनाम् ।
योगिनः सावधानत्वं यत्तदर्चनमात्मनः ॥ ११ ॥
सप्तप्रकरणानाम् ॥ १४७ ॥ सर्वे श्लोकाः ॥ १५८ ॥

इति श्रीयोगवासिष्ठसारे ब्रह्मनिरूपणं नामाष्टमं प्रकरणम् ॥ ८ ॥

श्रीवसिष्ठः ।

तस्मिन्देहेन्द्रियादीनां संघाते स्फुरति स्वयम्[३] ।
अयं सोऽहमिति भावः[४] स जीवो मलगुण्ठितः ॥ १ ॥
सर्वमेव चिदाकाशं ब्रह्मेतिघननिश्चये[१] ।
स्थितिं याते शमं याति जीवो निःस्नेहदीपवत् ॥ २ ॥
स्वमहत्त्वं यथोपेक्ष्य कश्चिद्विप्रो दुरीहया ।
अङ्गीकरोति शूद्रत्वं तथा जीवत्वमीश्वरः ॥ ३ ॥
असत्यमेव संकल्पभ्रमेणेदं शरीरकम् ।
जीवः पश्यति मूढात्मा बालो यक्षमिवोत्थितम् ॥ ४ ॥
मृत्स्नेभके[५] यथेभत्वं शिशुरध्यस्य[६] वल्गति ।
अध्यस्यात्मनि देहादीन्मूढस्तद्वद्विचेष्टते ॥ ५ ॥
चित्रसर्पः परिज्ञातो न सर्पभयदो यथा ।
जीवसर्पः परिज्ञातस्तथा न सुखदुःखदः ॥ ६ ॥

---

१ घनम्। २ आनन्दघनमित्यर्थः । ३ मणौ किरणौघ इव स्वभावतः स्फुरति सति। ४ सत्यत्वभावनावत्त्वं यत्। ५ मृद्विकारहस्तिनि । ६ बाल्यान्निश्चित्य।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

स्रजि सर्पोऽयमध्यस्तो मालायामेव लीयते ।
आत्मनः प्रोत्थितो भेद आत्मन्येव विलीयते ॥ ७ ॥
नैकमप्यङ्गदाद्यैश्च यथैकं हेम संस्थितम् ।
उपाधिभिरनेकोऽपि तथात्मैकः स्वरूपतः ॥ ८ ॥
शरीरेऽवयवा यद्वद्विकाराश्च यथा मृदः ।
अद्वैतं द्वैतवद्भाति तथा स्थावरजङ्गमम् ॥ ९ ॥
मणितोयघृतादर्शेष्वेकमप्यानन्दं यथा ।
भात्यनेकमिवात्माऽपि तथा धीष्वनुबिम्बितः ॥ १० ॥
धूलिधूमाम्बुदैर्यद्वन्मलिनीक्रियते नभः ।
परामृष्टस्तथैवात्मा विशुद्धः प्राकृतैर्गुणैः ॥ ११ ॥
आद्यन्तवति देहेऽसौ तथाभूत इवेक्ष्यते ।
वीचिवत्यम्भसि स्तम्भो यथा भात्यचलश्चले ॥ १२ ॥
अग्निसङ्गाद्यथा लोहमग्नित्वमुपगच्छति ।
आत्मसङ्गात्तथा गच्छत्यात्मतामिन्द्रियादिकम् ॥ १३ ॥
अदृश्यो दृश्यते राहुर्गृहीतेन यथेन्दुना ।
तथाऽनुभवमात्रात्मा दृश्येनात्मा विलोक्यते ॥ १४ ॥
आत्मनो जडसंयोगादनात्मत्वं जडस्य तु ।
स्यादात्मसङ्गादात्मत्वं जलाग्न्योः सङ्गवन्मिथः ॥ १५ ॥
असत्यजडचित्तांशनयनाच्चिद्रपुर्जडः ।
महाजलगतो वह्निरिव रूपं समुज्झति ॥ १६ ॥

---

१ सम्यग्दृष्टौ । २ गुणैः संमृष्टः । ३ स्वयं निर्गुणत्वात् । ४ जड भवति मोहात् ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

इक्षौ गुडं तिले तैलं काष्ठे वह्निर्दधिघृतं ।
धेनावाज्यं वपुष्यात्मा लभ्यते चैव यत्नतः ॥ १७ ॥
स्फटिकाश्मनि नीरन्ध्रे स्थितं खं वीक्ष्यते यथा ।
तथा सर्वपदार्थेषु चिद्रूपः परमेश्वरः ॥ १८ ॥
बहिरन्तःस्फुरज्ज्योतीरत्नकुम्भप्रदीपवत् ।
स्वप्रकाशाद्यथैवैकः स्वरूपमात्मनस्तथा ॥ १९ ॥
दर्पणे बिम्बितो ह्यर्कः प्रकाशं कुरुते यथा ।
तथा प्रकाशयत्यात्मा स्वच्छधीष्वनुबिम्बितः ॥ २० ॥
यत्र स्थितेयं विश्वश्रीः प्रतिभामात्ररूपिणी ।
रज्ज्वां भुजंगवद्भाति सोऽयमात्मा सदोदितः ॥ २१ ॥
आद्यन्तरहितः सत्यश्चिद्रूपो निर्विकल्पकः ।
आत्मा निरूपिताकाशो जीवस्याद्यः परात्परः ॥ २२ ॥
आत्मा विशुद्धचैतन्यस्वरूपः शाश्वतो विभुः ।
निर्विकारः स्वयंज्योतिः स्वभावोऽर्कप्रकाशवत् ॥ २३ ॥
आत्माऽनुभवमात्रात्मा सर्वगः सर्वसंश्रयः ।
प्रकाशानन्यचैतन्याव्यतिरिक्तोऽनिलौष्ण्यवत् ॥ २४ ॥
चित्तवर्जितचिन्मात्रः परमात्माऽवभासकः ।
स बाह्याभ्यन्तरव्यापी निष्कलो निश्चलाश्रयः ॥ २५ ॥
य आत्मा चिन्मयः स्वच्छः प्रबुद्धोऽपचयच्युतः ।

---

१ रत्नविशेषः । २ प्रकृतिः द्वैतबुद्धौ सत्यां सूर्ये प्रकाश इव भिन्नवद्भाति ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

हेयग्राह्योज्झितो देशकालजात्याद्यसंगतः ॥ २६ ॥
ब्रह्माण्डे च यथा वायुः सर्वभूतगतस्तथा ।
स एव भगवानात्मा तन्तुर्मुक्तास्विव स्थितः ॥ २७ ॥
यैव चिद्गगनाभोगभूषणे व्योम्नि भास्करे ।
धराविवरकोशस्थे सैव चित्कीटकोदरे ॥ २८ ॥
न बन्धोऽस्ति न मोक्षोऽस्ति ब्रह्मैवास्ति निरन्तरम् ।
नैकमस्ति न च द्वैतं संवित्स्फारो विजृम्भते ॥ २९ ॥
ब्रह्म चिद्ब्रह्म भुवनं ब्रह्म भूतपरम्परा ।
ब्रह्माहं ब्रह्म मच्छत्रुर्ब्रह्म मन्मित्रबान्धवः ॥ ३० ॥
चिदेवास्तीह चिन्मात्रमिदं चिन्मयमेव च ।
चित्त्वं चिदहमेवेति लोकाश्चिदिति संग्रहः ॥ ३१ ॥
चिच्चेत्यकलना बन्धस्तन्मुक्तिर्मुक्तिरुच्यते ।
चिच्चेत्याऽखिलमात्मेति सर्वसिद्धान्तसंग्रहः ॥ ३२ ॥

यदस्ति यद्भाति तदात्मरूपं
यच्चान्यतो भाति न चान्यदस्ति ।
स्वभावसंवित्प्रतिभाति केवला
ग्राह्यं ग्रहीतेति मृषा विकल्पः ॥ ३३ ॥

अष्टप्रकरणानाम्॥ १५८ ॥ सर्वे श्लोकाः ॥ १९१ ॥

इति श्रीयोगवासिष्ठसारे आत्मनिरूपणं नाम नवमं प्रकरणम् ॥ ९ ॥

---

१ स आत्मा द्वैतहीनोऽस्ति ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

श्रीवसिष्ठः ।

यत्र यत्र भवेत्तृष्णा संसारं विद्धि तत्र वै ।
प्रौढवैराग्यमास्थाय वीततृष्णः सुखी भव ॥ १ ॥
स्वप्नेन्द्रजालवत्पश्य दिनानि त्रीणि पञ्च वा ।
मित्रक्षेत्रधनागारदारा दायादसम्पदः ॥ २ ॥
दृश्यदर्शनसम्बन्धान्न भवेत्परमं सुखम् ।
तदेवैकान्तसंवित्त्या मनोनाशः परं पदम् ॥ ३ ॥
दृश्यदर्शनसम्बन्धे सुखसंविदनुत्तमा ।
दृश्यसंवलितो बन्धस्तन्मुक्त्या मुक्तिरुच्यते ॥ ४ ॥
तृष्णामात्रात्मको बन्धस्तन्नाशो मोक्ष उच्यते ।
भावासंसक्तिमात्रेण प्राप्ततुष्टिः सुखी भव ॥ ५ ॥
शुद्धं सदसतोर्मध्ये पदं लब्ध्वाऽवलम्ब्य तत् ।
सबाह्याभ्यन्तरं विश्वं मा गृहाण विमुञ्च मा ॥ ६ ॥
जडाजडदृशोर्मध्ये यत्तत्त्वं पारमार्थिकम् ।
अनन्ताकाशहृदयं तत्सदाऽश्रय सर्वदा ॥ ७ ॥
द्रष्टुर्दृश्यस्य सत्ताऽङ्ग बन्ध इत्यभिधीयते ।
द्रष्टा दृश्यवशाद्बद्धो दृश्याभावे विमुच्यते ॥ ८ ॥
द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह ।
दर्शनं प्रथमाभासमात्मानं समुपास्महे ॥ ९ ॥
द्वयोर्मध्यगतं नित्यमस्तिनास्तीति पक्षयोः ।

---

१ सत्यत्वदृष्टिवशात् । २ सर्वं ब्रह्मैवेत्येकज्ञानात् ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

प्रकाशकं प्रकाशानामात्मानं समुपास्महे ॥ १० ॥
निद्रादौ जागरस्यान्ते यो भाव उपजायते ।
तं भावं भावयन्साक्षादक्षयानन्दमश्नुते ॥ ११ ॥
प्रशान्तसर्वसंकल्पा या शिलावदवस्थितिः ।
जाग्रन्निद्राविनिर्मुक्ता सा स्वरूपस्थितिः परा ॥ १२ ॥
जडतां वर्जयित्वैकां शिलाया हृदयं च यत् ।
अमनस्कं महाबाहो तन्मयो भव सर्वदा ॥ १३ ॥
नित्यानन्दचिदाकाशस्वरूपः परमेश्वरः ।
मृद्राजनेषु मृदिव सर्वत्रास्ति पृथक्स्थितिः ॥ १४ ॥
अपारावारविस्तारसंवित्सलिलवलानैः ।
चिदेकार्णव एकोऽयं स्वयमात्मा विजृम्भते ॥ १५ ॥
भरिताशेषदिक्कुञ्जमनन्ताकाशनिर्भरम् ।
एकं वस्तु जगत्सर्वं चिन्मात्रं वारिवाम्बुधिः ॥ १६ ॥
निरंशत्वाद्विभुत्वाच्च तथाऽनश्वरभावतः ।
ब्रह्मव्योम्नोर्न भेदोऽस्ति चैतन्यं ब्रह्मणोऽधिकम् ॥ १७ ॥
निस्तरङ्गोऽतिगम्भीरः सान्द्रानन्दसुधार्णवः ।
माधुर्यैकरसाधार एक एवास्ति सर्वतः ॥ १८ ॥
समस्तं खल्विदं ब्रह्म सर्वमात्मेदमाततम् ।
अहमन्य इदं चान्यदित्यखण्डं न खण्डय ॥ १९ ॥

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

यदैव ब्रह्मणो रूपं तत्त्वं बुद्धमखण्डितम् ।
तदा निस्तीर्णसंसारः परमेश्वरतां गतः ॥ २० ॥
समस्तमेव ब्रह्मेति भाविते ब्रह्म वै पुमान् ।
पीतेऽमृतेऽमृतमयः को नाम न भवोदिति ॥ २१ ॥
भव्योऽसि[1] चेत्तदेतस्मात्सर्वमाप्नोषि निश्चयात् ।
नो चेद्बहूपि संप्रोक्तं त्वयि भस्मनि हूयते ॥ २२ ॥
अपि विज्ञाततत्त्वेन त्वयाऽभ्यस्यमिदं सदा ।
न नाममात्रात्कतकफलमम्बुप्रसादकम् ॥ २३ ॥
अहमेव परं ब्रह्म वासुदेवाख्यमव्ययम् ।
इति स्यान्निश्चयो मुक्त्यै बद्ध एवान्यथा भवेत् ॥२४॥
नेति नेति[2] नेति[3] नेति[4] शेषितं यत्परं पदम् ।
निराकर्तुमशक्यत्वात्तदस्मीति सुखी भव ॥ २५ ॥
आत्मानं सततं ब्रह्म विद्धि चैवं निरन्तरम् ।
अहं ध्याता परं ध्येयमखण्डं खण्ड्यते कथम्॥२६॥
सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते ।
ध्यानस्याविस्मृतिः सम्यक् समाधिरभिधीयते॥२७॥
ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना ।
संप्रज्ञातसमाधिः स्याज्ज्ञानाभ्यासप्रकर्षितः ॥२८॥
कल्पान्तवायवो यान्तु यान्तु चैकत्वमर्णवाः ।

---

१ भाग्यवान् । २ स्थूलप्रपञ्चम् । ३ सूक्ष्मप्रपञ्चम् । ४ कारणप्रपञ्चम् ।
५ श्रद्धा चिन्मात्रम् ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

तपन्तु द्वादशादित्या नास्ति निर्मनसः क्षितिः ॥ २९ ॥
या चितिः सर्वभूतानामुदयक्षयकारिणी ।
तां चित्तिं पश्य कायस्थां पूर्णानन्दघनामृताम् ॥ ३० ॥
मनोदृश्यमिदं सर्वं यत्किञ्चित्सचराचरम् ।
मनसोऽप्युन्मनीभावाद्वैतं नैवोपलभ्यते ॥ ३१ ॥
यदस्पन्दं शिवं शान्तं यस्यान्तर्जगतः स्थितिः ।
स्पन्दास्पन्दविलासात्मा स एकोऽत्र चिदाकृतिः ॥३२॥

अहिनिर्व्वयिनीमहिरात्मतया
जगृहे परिमोक्षणतस्तु पुरा ।
परिमुच्य तु तामुरगः स्वबिले
न निरीक्षत आत्मतया तु पुनः ॥ ३३ ॥

दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते ।
गुणबुद्ध्या तु विहितं न करोति यथार्भकः ॥ ३४ ॥
अनुत्कीर्णे तथा स्तम्भे संस्थिता सालभञ्जिका ।
तथा विश्वं स्थितं तत्र तेन शून्यं न तत्पदम् ॥ ३५ ॥
यथा न पुत्रिकाशून्यः स्तम्भोऽनुत्कीर्णपुत्रिकः ।
तथा भातं जगद्ब्रह्म तेन शून्यं न तत्पदम् ॥ ३६ ॥

---

१ सङ्कल्पमात्रमेव ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

सौम्याम्भसि यथा वीचिर्न चास्ति न च नास्ति च।
तथा जगद्ब्रह्मणीदं शून्याशून्यपदं गतम् ॥ ३७ ॥

अयमहमिति निश्चयो वृथा य-
स्तमलमपास्य महामते! स्वबुद्ध्या।
यदितरदवलम्ब्य तत्पदं त्वं
व्रज पिब भुङ्क्ष्व न बद्ध्यसेऽमनस्कः ॥३८॥

नवप्रकरणानाम्। १९१ ॥ सर्वे श्लोकाः ॥ २२९ ॥

इति श्रीयोगवासिष्ठसारे आत्मैक्यवर्णनं नाम दशमं प्रकरणम् ॥ १० ॥
समाप्तश्चायं योगवासिष्ठसारः। अयमात्मार्पणमेवास्तु ॥

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

क्रेय्य पुस्तक सूची ।

नाम	विषयाः	मूल्यं रु० आ०
१	नित्यकर्मविधिः–स्नानविधि-सन्ध्योपासना-नैवेद्य-मन्त्रः–भोजनविधि–पञ्चगव्यविध्यात्मकः	०–३३
२	नित्यकर्मविधिः–स्नानविधि–सन्ध्योपासना-नैवेद्य-मन्त्र–भोजनविधि–पञ्चगव्यविधि–विष्णुपञ्चायतनपूजात्मकः। हिन्दीभाषायां इतिकर्तव्यतायुक्तः तथा,–गणेश-कवच-गुरुस्तुति–गायत्री-गौरी-मुकुन्दमालायुतश्च	०–६
३	कर्मकाण्डपुस्तकं (सांवत्सरिकपितृक्रियोपयोगि)	०–१४
४	वेदकल्पद्रुमः (हवनीयक्रियोपयोगी)शङ्कुप्रतिष्ठादियुतश्च	१–४
५	मेखलापुस्तकम् (ऋचक-विवाह-उपनयन-अग्निकुण्डपूजा–नान्दीमुखश्राद्ध–इहकेलिपूजाकन्यासंस्कारात्मकम्)	१–८

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

विज्ञापन ।

नाम	विषयाः	मूल्यं रु० आ०
६	शिवपूजा । बहुरूपगर्भ–महिम्नःपार–शिवकवच–शिवनिर्वाण–चामरस्तोत्रत्रय-शिवक्षमापनस्तोत्र-दीनाक्रन्दन–शिवपूजा––कैवल्योपनिषत्-गणेश-स्तवराज-ॐनमःशिवायेत्यक्षरस्तोत्रद्वयात्मिका	०–६
७	गणेशदुर्गास्तोत्रावली ।(गणेशस्तोत्रत्रय–गणपतिविद्या––रत्नमाला–शारिकास्तोत्र––ब्राह्मी–विद्यात्मिका	०–५
८	पञ्चस्तवीसमेता सौंदर्यलहरी ।	०–४॥
९	वटुकपूजा (कलशपूजा वैश्वदेवव्याहृतिसमेता)	०–६
१०	पार्थिवेश्वरपूजा (कलशपूजा–वैश्वदेवव्याहृतिसमेता)	०-६
११	उपदेशपञ्चकम् (शंकराचार्यकृतम्) रत्नप्रभाव्याख्यासमेतम्	०–३
१२	भक्तिविवेकसारः । (अज्ञानबोधिनी–आत्मबोध-प्रह्लाद–मुचुकुन्द–रासक्रीडा–पञ्चाध्यायी–गोपीस्तुति-भिक्षुगीता–गणेश-गुरु-गायत्री-शारिका–ज्वालाराज्ञी-त्रिपुरसुन्दरी-कतिपयाविष्णुस्तोत्र–भजगोविन्द-अङ्गनामङ्गनां-शिवस्तोत्र-नारायणोपनिषत्–शैवप्रातःकृत्य–सूर्यादि–नवग्रहस्तोत्र–बृहद्ब्राह्मीविद्या-पराप्रवेशिकात्मकः	०–११

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

विज्ञापन ।

नाम	विषयाः	मूल्यं	रु० आ०
१३ रुद्रपञ्चकम्–रुद्रमंत्र–चम–सौमारुद्र–दीक्षा-शताध्यायात्मकम्	....	....	०–४
१४ चमानुवाक्यम्	....	....	०–२।
१५ योगवासिष्ठसारः	....	....	०–४
१६ भवानीसहस्रनामस्तोत्रम् (स्वाहाकाराऽपर-पर्यायनामावली–इन्द्राक्षीस्तोत्रयुतं च)			०–५
१७ नित्यकर्मविधिः स्तोत्रावलीयुतः			१–०

हमारे क्रय्य पुस्तक मिलनेका पताः–

पं० केशव भट्ट ज्योतिषी

पाठशाला टीचर जिला रैणावारी "महल्ला"

भाग ज्योगीलङ्कर कश्मीर-श्रीनगर ।

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

CC-0. Tej K Zadoo Collection. Digitized by eGangotri

CC-0. Tej K Zadoo Collection. Digitized by eGangotri